संस्कृत-वार्ता:

17.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· लोकसभा निर्वाचनस्य प्रथमचरणे सप्तदश राज्यानां केन्द्र-शासित-प्रदेश-चतुष्टयस्य द्वयोत्तर-एकशत लोकसभासनेषु शुक्रवासरे मतदानं भविष्यति।

· प्रधानमन्त्री नरेन्द्रमोदी-अद्य त्रिपुरायां एकां जनसभां सम्बोधितवान्।

· अद्य भगवत: श्रीरामचन्द्रस्य जन्मोत्सव: देशस्य नैकेषु भागेषु महतोल्लासेन परिपाल्यते।

· अमरीकया उक्तं यत् राष्ट्रपति: जो बाइडेन: ईरानस्य परमाणु-कार्यक्रमे नूतन प्रतिबन्धान् स्थापयितुं सन्नद्धा: अस्ति।

· आई.पी.एल. इति क्रिकेट क्रीडा शृङ्खलायां अद्य गुजरात टाइटंस इति दलम् दिल्ली कैपिटल्स दलम् सम्मुखी करिष्यति।

<u>लोकसभा – विधानसभा – निर्वाचनं</u>

लोकसभा निर्वाचनस्य प्रथमचरणम् अद्य सायं पंचवादने पूर्णं अभवत्। राजनीतिक-दलै: यथा-समर्थं मतदातृन् आकृष्टुं सर्वसम्भव-प्रयासा: कृता:। अस्मिन् चरणे सप्तदश राज्यानां केन्द्र-शासित-प्रदेश-चतुष्टयस्य द्वयोत्तर-एकशत लोकसभासनेषु शुक्रवासरे मतदानं भविष्यति। सहैव अरूणाचल प्रदेश – सिक्किम राज्ययो: विधानसभा निर्वाचनेभ्य: अपि एकस्मिन् एव चरणे शुक्रवासरे मतदानं भविष्यति।

<u>प्रधानमन्त्री-त्रिपुरा</u>

प्रधानमन्त्री नरेन्द्रमोदी-अद्य त्रिपुरायां कांग्रेस-कम्युनिस्ट-दलं इण्डिया-संयुतिं च अधिक्षिपत्। अपि च उक्तम् दलद्वये दक्षिण भारतस्य केरलराज्ये परस्परं विरोधिनौ स्त:। अगरतलायां नैर्वाचनिक-जनसभां सम्बोधयन् प्रधानमन्त्री नामं विनैव कांग्रेस् दलं आरोपयत् यत् दलस्य युवराज: उत्तर प्रदेशात् पलायित: केरले च शरणं अधिगच्छति।

## अयोध्या – रामनवमी

अद्य भगवत: श्रीरामचन्द्रस्य जन्मोत्सव: देशस्य नैकेषु भागेषु महतोल्लासेन परिपाल्यते। अयोध्यायां रामलला-मन्दिरे विशेष प्रबन्धा: विद्यन्ते। राम-जन्मभूमि न्यासेन श्रद्धालुनां सौकर्याय एते प्रतिबन्धा: कृता: सन्ति। अत्रावसरे राष्ट्रपति: द्रौपदीमुर्मु:, उपराष्ट्रपति: जगदीप धनखड़:, प्रधानमन्त्री नरेन्द्रमोदी च देशवासिभ्य: शुभकामना: प्रदत्तवन्त:।

## सूर्य - तिलक

रामनवम्याः अवसरे अद्य मध्याह्ने षोडश-निमेषाधिक-द्वादशवादने अयोध्यामन्दिरे विराजमानस्य श्रीरामलला इत्येतस्य मस्तके सूर्यतिलकं सुदीप्तं जातम्। विशेषक्रियाविधिना रामलला इत्येतस्य प्रतिमासां सूर्यतिलकस्थापनं संभवं सञ्जातम्। अयोध्यामन्दिरे रामलला इत्येतस्य प्राणप्रतिष्ठायाः अनन्तरं तत्र एतत् प्रथमं रामनवमीपर्वायोजनम् अस्ति। तावत् श्रद्धालवः अद्य प्रात: कालादेव भगवतः श्रीरामस्य दर्शनार्थं राममंदिरं यान्ति। सकलमपि अयोध्यानगरम् अद्य सश्रद्धं सोत्साहं च रामजन्मोत्सवं परिपालयति।

## प्रधानमन्त्री - जनसभा

प्रधानमंत्री अथ भारतीय जनता पार्टीति दलस्य वरिष्ठः नेता नरेन्द्रमोदी उक्तवान् यत् जपेति दलस्य नेतृत्वे राष्ट्रियजनतान्त्रिक-संयुतिः समेषां समावेशने विश्वसिति। प्रधानमन्त्री कथितवान् यत् केनापि सह भेदभावं विनैव प्रत्येकमपि जनः समेषां प्राशासनिक-योजनानां लाभं प्राप्नोति। असमराज्यस्य नलबाडीस्थले जनसभां सम्बोधयन् श्री मोदी उक्तवान् यत् निर्धनेभ्यः शुल्कमुक्त-खाद्य-अन्नस्य प्रावधानं यथा-अवस्थमेव स्थापयिष्यते। सममेव आगामि-पञ्चवर्षेषु त्रिकोटिसंख्याकाः आवासाः निर्मास्यन्ते इत्यपि समाश्वासितवान् प्रधानमन्त्री। तेन एतदपि कथितं यत् भाजपेति दलस्य संकल्पपत्रे सप्ततिः वर्षस्य अधिक-आयुवर्गस्य सर्वेभ्यः वृद्धजनेभ्यः आयुष्मान भारत योजनायाः लाभं प्रदास्यते। अनया योजनया परिवारेषु व्यय-समस्या प्रायः अल्पमिता भविष्यति।

अत्रान्तरे प्रधानमंत्री कांग्रेसदलं कट्वालोचितवान् अथ आरोपितवान् यत् कांग्रेस-दलेन असम-पूर्वोत्तरस्य अन्यानि क्षेत्राणि नैव अवलोकितानि। तावत् भाजपेति दलं समावेशने विश्वसिति कांग्रेसदलं च पृथक्तावादं समर्थयति। प्रधानमंत्री उक्तवान् यत् असमराज्यस्य जैव-विविधता अथ संस्कृतिः द्वयमपि एतत् अतीव समृद्धं अस्ति। एतत् वैश्विकमंचे प्रापयितुं प्रधानमन्त्री समाश्वासितवान्। प्रधानमंत्री उक्तवान् यत् केन्द्रप्रशासनेन कृषकाणां हितं निध्याय न्यूनतम-समर्थन-मूल्ये वृद्धिः अभवत्। अवधेयं यत् नलबाडी-विधानसभाक्षेत्रं बारपेटा-संसदीय-आसनस्य

अन्तर्गतम् अस्ति, यत्र लोकसभानिर्वाचनस्य तृतीयचरणाय मे मासस्य सप्तमे दिनाङ्के मतदानं भविष्यति।

<u>अमरीका-ईरान – प्रतिबन्ध:</u>

अमरीकया उक्तं यत् राष्ट्रपति: जो बाइडेन: ईरानस्य परमाणु-कार्यक्रमे नूतन प्रतिबन्धान् स्थापयितुं सन्नद्धा: अस्ति। गतसप्ताहे इज़रायल देशे ईरानस्य अभूतपूर्व वायवीय-आक्रमणस्य अनन्तरं अमरीकाया: एतत् वक्तव्यम् आगतम्। अमरीकाया: राष्ट्रीय-सुरक्षा-परामर्शद: अनुसारं राष्ट्रपति: जो-बाइडेन: जी-सप्त-देशान् समेत्य सर्वै: सहयोगिभि: सह समन्वयनं कुर्वन् अस्ति। अमुना संसदि सर्वै: नेतृभि: सह व्यापक-विचार-विमर्श: कृत:। आगामि दिनेषु अमरीका ईरानं च समेत्य तस्य रक्षाकार्यक्रमाणां समर्थन-कर्तृषु अन्यासु संस्थासु अपि नूतन-प्रतिबन्धान् स्थापयिष्यति।

<u>वर्षा-यूएई ओमान श्च</u>

संयुक्त – अरब अमीराते विनाशकारी – वर्षा – कारणेन जलौघ-स्थित्या जनजीवनं दुष्प्रभावितं। मुख्यराज्यमार्गा: वर्षा-कारणेन जलमग्ना: सन्ति। प्रचण्ड-वात्या-वृष्ट्या च अस्मिन् क्षेत्रे जलप्लावं निध्याय अधिकारिभि: जना: गृहेषु एव स्थातुं परामृष्टा:। विद्यालयेषु ऑनलाईन-इति-दूरस्थ - माध्यमेन अध्ययनं आरब्धम्। प्राशासनिक कर्मिण: च गृहात् एव कार्यं कर्तुम् निर्दिष्टा:।

<u>आईपीएल</u>

आई.पी.एल. इति क्रिकेट क्रीडा शृङ्खलायां अद्य अहमदाबादस्य नरेन्द्रमोदी क्रिकेट क्रीडांगणे गुजरात टाइटंस इति दलम् दिल्ली कैपिटल्स दलम् सम्मुखी करिष्यति। स्पर्धेयं अद्य सायं सार्धसप्तवादने समारप्स्यते।

।। इति वार्ता: ।।